**सूचीकटाह** पु० न्यायभेदे न्यायशब्दे ४१७० पृ० दृश्यम् ।

**सूचीपत्त्रा** स्त्री सूचीव पत्त्रमस्याः । गण्डदूर्वायाम् राजनि०

**सूचीमुख** सूचीव मुखमस्य । १सितकुशे राजनि० । २हीरके न० हेमच० । ६त० । ३सूच्यामुखे न० ।

**सूच्यग्रस्थूलक** पु० सूच्यग्रमिव स्थूलः स्वार्थे क । (उलुखड़) तृणभेदे रत्नमा० ।

**सूच्यास्य** पुंस्त्री० सूचीव आस्यमस्य । १मूषिके हेमच० स्त्रियां योपधत्वात् टाप् । ६त० । २सूच्या अग्रे न० ।

**सूच्याह्व** पु० सूच्या आह्वा आह्वा यस्य । सिताबरके हेमच० ।

**सूत** पु० सू-प्रसवे प्रेरणे ऐश्वर्य्ये वा क्त । १सूर्य्ये अनेकार्थको० । २अर्कवृक्षे ३क्षत्रियजाते ब्राह्मणीगर्भजे वर्णसङ्करभेदे ४त्वष्टरि ५सारथौ ६वन्दिनि मेदि० ७मागधे ८पारदे पुंन० अमरः । ९प्रसूते १०प्रेरिते च त्रि० । ११लोमहर्षणाख्ये पुराणवक्तरि च तदुत्पत्तिकथा

"सत्रान्ते सूतमनघं नैमिषीया महर्षयः । पुराणसंहितां पुण्यां पप्रच्छ लोमहर्षणम् । त्वया सूत ! महाबुद्धे भगवान् ब्रह्मवित्तमः । इतिहासं पुराणार्थं व्यासः सम्यगुपासितः । तस्य ते सर्वरोमाणि वचसा हृषितानि यत् । द्वैपायनस्य भगवांस्ततो वै रोमहर्षणः । भवन्तमेव भगवान् व्याजहार स्वयं प्रभुः । मुनीनां संहितां वक्तुं व्यासः पौराणिकीं पुरा । त्वं हि स्वायम्भुवे यज्ञे सुत्याहे वितते सति । संभूतः संहितां वक्तुं स्वांशेन पुरुषोत्तम !" कौर्मे १अ० । "ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति । पृषदाज्यात् समुत्पन्नः सूतः पौराणिको द्विजः । वक्ता वेदादिशास्त्राणां त्रिकालामलतत्त्ववित् । तीर्थयात्राप्रसङ्गेन नैमिषारण्यमागमत्" वह्निपु० १अ० ।

जातिभेदसूतोत्पत्तिकथा "हस्ते तु दक्षिणे चक्रं दृष्ट्वा तस्य पितामहः । विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ । तस्य वै जातमात्रस्य यज्ञे पैतामहे शुभे । सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामते ! । तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः । प्रोक्तौ तदा मुनिवरैस्तावुभौ सूतमागधौ । स्तूयतामेष नृपतिः पृथुर्वैन्यः प्रतापवान्" विष्णुपु० १अंशे १३अ० । "एतस्मिन्नेव काले तु यज्ञे पैतामहे शुभे । सूतः सूत्यां समुत्पन्नः सौत्येऽहनि पुराणवित् । तेषां यज्ञे पुनस्त्वेवमुत्पन्नौ सूतमागधौ । पृथोःस्तवार्थं तौ तत्र समाहूतौ महर्षिभिः । तावूचुर्ऋषयः सर्वे स्तूयतामेष पार्थिवः । तैर्नियुक्तोऽस्य कर्माणि पृथोर्योनि महात्मनः । तुष्टुवांस्तानि सर्वाणि आशीर्वादांस्ततः परान् । तयोस्तवान्ते सुप्रीतः पृथुः प्रादात् जनेश्वरः" वह्निपु० । "क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः" । "सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम्" मनुः ।

**सूततनय** पु० सूतस्य तनयः । भारतप्रसिद्धे राधेये कर्णे हेमच० । सूतपुत्रादयोऽप्यत्र । तस्य सूतपालितत्वात्तथात्वम्

**सूति** स्त्री सू+क्तिन् । १प्रसवे "प्रबलैः सूतिमारुतैः" स्मृतिः सूयते कण्ड्यते सोमोऽत्र सू-आधारे क्तिन् । २सोमाभिषवभूमौ श्रीधरः ।

**सूतिका** स्त्री सू-क्त स्वार्थे क अत इत्त्वम् । नवप्रसूतायां स्त्रियाम् "उदक्यां सूतिकां विना" इति स्मृतिः ।

**सूतिकागार** न० सूतिकाया निवासयोग्यमगारम् । सूतिकागृहे अरिष्टे । सूतिकागृहादयोऽप्यत्र ।

तत्करणप्रवेशमुहूर्त्तादिकं पीयू० उक्तं यथा

"उक्तञ्च श्रीपतिना "पुनर्वसौ च सूतिकागृहस्य निर्मितिः शुभा । विरञ्चिविष्णुभान्तरे प्रवेशनं हितं भवेत्" इति । विरञ्चिरभिजिन्नक्षत्रम् अन्तरे मध्ये विरञ्चिविष्णुतारयोरित्येव सप्तम्या अधिकरणत्वे बोधिते अन्तरपदोक्तिः स्पष्टार्था । तदेतद्ब्राह्मणव्यतिरिक्तवर्णत्रयविषयम् । यदाह लल्लः "पुनर्वसौ नृपादीनां कर्त्तव्यं सूतिकागृहम् । श्रवणाभिजितोर्मध्ये प्रवेशं तत्र कारयेत्" इति । आवश्यकत्वे तु श्रवणाभिजितोर्मुहूर्त्तमुदयो ग्राह्यः वा इत्यर्थः । ब्राह्मणस्य तु प्रागुक्तनक्षत्रेष्वेव सूतिकागृहनिर्माणप्रवेशौ तत्र सूतिकागृहं नैर्ऋत्यां कार्य्यम् । यदाह वृद्धवसिष्ठः "ऐन्द्र्यां तु विक्रमस्थानमाग्नेय्यां पचनालयः । वारुण्यां भोजनगृहं नैर्ऋत्यां सूतिकागृहम् । याम्यायां शयनस्थानं वायव्यां पशुमन्दिरम् । कौबेर्यां तु धनस्थानम् ऐशान्यां देवतालयः" इति । स्मृतिभास्करे गर्गः "वारेऽनुकूले राशौ तु दिने दोषविवर्जिते । सानुकूलदिशि प्रोक्तं सूतिकाभवनं बुधैः" इति । कालानियम उक्तो रत्नकोषे "आसन्नप्रसवे मासि कुर्य्याच्चैव विशेषतः । तद्वत् प्रसवकाले स्यादिति शास्त्रेषु निश्चयः" इति । वराहेणात्रानेकनक्षत्राणामभिधानं कृतं यथा "हस्तादित्यशशाङ्कतिष्यपवनप्राज्येशमित्रोत्तराचित्राश्विश्रवणेषु वृश्चिकघटौ हित्वा विरिक्ते तिथौ । शुक्राचार्य्यशनेश्वरज्ञशशिनां वारेऽनुकूले विधौ सद्भिर्वेश्मनि सूतिकागृहविधिः क्षेमङ्करः कीर्त्यते" इति । वेश्मनि चतुर्थस्थाने